कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।
अकुला समयान्तस्था समयाचारतत्परा ॥ ८८
मूलाधारैकनिलया ब्रह्मग्रन्थिविभेदिनी (१००) ।
मणिपूरान्तरुदिता विष्णुग्रन्थिविभेदिनी ॥ ८९
आज्ञाचक्रान्तरालस्था रुद्रग्रन्थिविभेदिनी ।
सहस्राराम्बुजारूढा सुधासाराभिवर्षिणी ॥ ९०
तडिल्लतासमरुचिः षट्चक्रोपरिसंस्थिता ।
महासक्तिः कुण्डलिनी (११०) बिसतन्तुतनीयसी ॥ ९१
भवानी भावनागम्या भवारण्यकुठारिका ।
भद्रप्रिया भद्रमूर्तिर्भक्तसौभाग्यदायिनी ॥ ९२
भक्तिप्रिया भक्तिगम्या भक्तिवश्या (१२०) भयापहा ।
शांभवी शारदाराध्या शर्वाणी शर्मदायिनी ॥ ९३
शाङ्करी श्रीकरी साध्वी शरच्चन्द्रनिभानना ।
शातोदरी (१३०) शान्तिमती निराधारा निरञ्जना ॥ ९४
निर्लेपा निर्मला नित्या निराकारा निराकुला ।
निर्गुणा निष्कला (१४०) शान्ता निष्कामा निरुपप्लवा ॥ ९५
नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।
नित्यशुद्धा नित्यबुद्धा निरवद्या (१५०) निरन्तरा ॥ ९६
निष्कारणा निष्कलङ्का निरुपाधिर्निरीश्वरा ।
नीरागा रागमथनी निर्मदा मदनाशिनी ॥ ९७

महाकैलासनिलया मृणालमृदुदोर्लता ।
महनीया (५८०) दयामूर्तिर्महासाम्राज्यशालिनी ॥ १६८
आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।
श्रीषोडशाक्षरीविद्या त्रिकूटा कामकोटिका ॥ १६९
कटाक्षकिङ्करीभूतकमलाकोटिसेविता (५९०) ।
शिरःस्थिता चन्द्रनिभा भालस्थेन्द्रधनुष्प्रभा ॥ १७०
हृदयस्था रविप्रख्या त्रिकोणान्तरदीपिका ।
दाक्षायणी दैत्यहन्त्री दक्षयज्ञविनाशिनी (६००) ॥ १७१
दरान्दोलितदीर्घाक्षी दरहासोज्ज्वलन्मुखी ।
गुरुमूर्तिर्गुणनिधिर्गोमाता गुहजन्मभूः ॥ १७२
देवेशी दण्डनीतिस्था दहराकाशरूपिणी ।
प्रतिपन्मुख्यराकान्ततिथिमण्डलपूजिता (६१०) ॥ १७३
कलात्मिका कलानाथा काव्यालापविनोदिनी ।
सचामररमावाणीसव्यदक्षिणसेविता ॥ १७४
आदिशक्तिरमेयात्मा परमा पावनाकृतिः ।
अनेककोटिब्रह्माण्डजननी (६२०) दिव्यविग्रहा ॥ १७५
क्लींकारी केवला गुह्या कैवल्यपददायिनी ।
त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस्त्रिदशेश्वरी ॥ १७६
त्र्यक्षरी (६३०) दिव्यगन्धाढ्या सिन्दूरतिलकाञ्चिता ।
उमा शैलेन्द्रतनया गौरी गन्धर्वसेविता ॥ १७७

स्वर्गापवर्गदा शुद्धा जपापुष्पनिभाकृतिः ।
ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ॥ १९८
दुराराध्या दुराधर्षा पाटलीकुसुमप्रिया ।
महती मेरुनिलया मन्दारकुसुमप्रिया ॥ १९९
वीराराध्या विराड्रूपा विरजा विश्वतोमुखी (७८०) ।
प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी ॥ २००
मार्तण्डभैरवाराध्या मन्त्रिणीन्यस्तराज्यधूः ।
त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा (७९०) ॥ २०१
सत्यज्ञानानन्दरूपा सामरस्यपरायणा ।
कपर्दिनी कलामाला कामधुक् कामरूपिणी ॥ २०२
कलानिधिः काव्यकला रसज्ञा रसशेवधिः ।
पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ॥ २०३
परंज्योतिः परंधाम परमाणुः परात्परा ।
पाशहस्ता (८२०) पाशहन्त्री परमन्त्रविभेदिनी ॥ २०४
मूर्तामूर्ता नित्यतृप्ता मुनिमानसहंसिका ।
सत्यव्रता सत्यरूपा सर्वान्तर्यामिणी सती (८२०) ॥ २०५
ब्रह्माणी ब्रह्मजननी बहुरूपा बुधार्चिता ।
प्रसवित्री प्रचण्डाज्ञा प्रतिष्ठा प्रकटाकृतिः ॥ २०६
प्राणेश्वरी (८३०) प्राणदात्री पञ्चाशत्पीठरूपिणी ।
विशृंखला विविक्तस्था वीरमाता वियत्प्रसूः ॥ २०७

